* श्रीमते रामानुजाय नमः *

श्रीवैष्णवानां सन्ध्योपासनविधिः

प्रकाशक—

पण्डित श्रीदामोदराचार्य वैदिक एवं ज्योतिषाचार्यः

श्रीविजयराघव मन्दिर

विभीषणकुण्ड, अयोध्या

सम्वत् २०३८ १००० प्रतियाँ

मुद्रक : श्रीरङ्गनाथ प्रेस, वृन्दावन।

दो शब्द

पण्डित श्रीदामोदराचार्य जी वैदिक एवं ज्योतिषाचार्य तथा विशिष्ट विद्वान् श्रीवैष्णव थे। उन्होंने श्रीवैष्णवों के लिये सन्ध्या विधि का संकलन करके श्रीविजयराघव मन्दिर अयोध्या को प्रकाशनार्थ दिया था जिसे श्रीरङ्गनाथ प्रेस, वृन्दावन उ० प्र० से श्रीवैष्णवों के उपयोग करने हेतु मुद्रित कराया गया है।

आशा है इस सन्ध्याविधि से श्रीवैष्णवों को सरलता पूर्वक सन्ध्या करने की प्रेरणा प्राप्त होगी। सन्ध्या नित्यकर्म है। इसके न करने पर द्विजों को प्रत्यवाय लगता है, अतः संन्ध्या अवश्य करणीय कर्म है।

संम्वत २०३८ *श्रीराघवाचार्यः*

धनुर्मास। श्रीविजयराघव मन्दिर

विभीषणकुण्ड, अयोध्या (उ० प्र०)

अथ प्रातः सन्ध्याप्रयोगः

प्रोक्षणम्—अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।
यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥१॥

आचमनम्—ॐ अच्युताय नमः । ॐ अनन्ताय नमः । ॐ गोविन्दाय नमः । इति त्रिरपः पिबेत् ॥

न्यासाः—ॐ केशवाय नमः "इति दक्षिणाङ्गुष्ठेन दक्षिण कपोलं स्पृशेत् । ॐ नारायणाय नमः" इति वामकपोलं स्पृशेत् । ॐ माधवाय नमः "इति अनामिकाङ्गुष्ठाभ्यां दक्षिणनेत्रं स्पृशेत् । ॐ गोविन्दाय नमः" "इति वामनेत्रं स्पृशेत् । ॐ विष्णवे नमः" इति तर्जनी अङ्गुष्ठाभ्यां दक्षिण नासिकां स्पृशेत् । ॐ मधुसूदनाय नमः, इति वामनासिकां स्पृशेत् । ॐ त्रिविक्रमाय नमः, इति कनिष्ठिकाङ्गुष्ठाभ्यां दक्षिणकर्णं स्पृशेत् । ॐ वामनाय नमः, इति वामकर्णं स्पृशेत् । ॐ श्रीधराय नमः इति मध्यमाङ्गुष्ठाभ्यां दक्षिणभुजं स्पृशेत् । ॐ हृषीकेशाय नमः इति वाम भुजं स्पृशेत् । ॐ पद्मनाभाय नमः इति अङ्गुष्ठं व्यतिरिक्ता-

ङ्गुलिभिः नाभिं स्पृशेत्। ॐ दामोदराय नमः, इति पञ्चाङ्गुलिभिः मस्तकं स्पृशेत्॥

प्राणायामः—ॐ भूः, ॐ भुवः, ॐ स्वः, ॐ महः, ॐ जनः, ॐ तपः, ॐ सत्यं, ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः अचोदयात्॥ ॐ आपो ज्योति रसोऽमृतं ब्रह्म भूर्भुवः स्वरोम्।

सङ्कल्पः-श्रीभगवदाज्ञया भगवत्कैङ्कर्य्यरूपं प्रातः सन्ध्यावन्दनं करिष्ये।

मार्जनम्—ॐ आपोहिष्ठामयो भुवः। ॐ तान ऊर्जे दधातन। ॐ महेरणाय चक्षसे। ॐ यो वः शिवतमोरसः। ॐ तस्य भाजयते हनः। ॐ उशतीरिव मातरः। ॐ तस्मा अरङ्गमामवः। ॐ यस्य क्षयाय जिन्वथ। ॐ आपोजन यथा च नः।

अम्बुप्राशनम्-ॐ सूर्य्यश्च मामन्युश्च मन्युपतयश्च मन्युकृतेभ्यो पापेभ्यो रक्षन्तां यद्रात्र्यापापमकार्षं मनसा वाचा हस्ताभ्यं पद्भ्यां मुदरेण शिश्ना रात्रिस्तदवलुम्पतु। यत् किञ्च दुरितं मयि इदमहं माममृतयोनौ सूर्य्ये ज्योतिषि जुहोमि स्वाहा। इति पबेत्॥ तत आचमनं पूर्ववत्।

न्यासः, मार्जनम्-पूर्ववत् । मार्जनं "आपोहिष्ठा मयो भुवः इत्यादिभिः ॥

सूर्य्यार्घ्यप्रदानम्—ॐ भूर्भुवः स्वः तत्सवितु र्वरेण्यं भर्गो देवस्य धी महि । धियो यो नः प्रचोदयात् ।

पूर्ववत् प्राणायामः—ॐ भूः, ॐ भुवः, ॐ स्वः..... इत्यादिभिः ॥

सङ्कल्पः—श्रीभगवदाज्ञया भगवत्कैङ्कर्यरूपं प्रातः सन्ध्या कालातीत दोषपरिहारार्थं तुरीयार्घ्यप्रदानं करिष्ये । ततो गायत्रीमन्त्रेण चतुर्थार्घ्यं दद्यात् ॥

परिषेचनम्—ॐ भूर्भुवः स्वः, इति जलेनात्म वेष्टनम् ।

आचमनम्—ॐ अच्युताय नमः, ॐ अनन्ताय नमः, ॐ गोविन्दाय नमः, इति पिबेत् ॥

—तर्पणम्—ॐ केशवं तर्पयामि, ॐ नारायणं तर्पयामि । ॐ माधवं तर्पयामि । ॐ गोविन्दं तर्पयामि । ॐ विष्णुं तर्पयामि । ॐ मधुसूदनं तर्पयामि । ॐ त्रिविक्रमं तर्पयामि । ॐ वामनं तर्पयामि । ॐ श्रीधरं तर्पयामि । ॐ हृषीकेशं तर्पयामि । ॐ पद्मनाभं तर्पयामि । ॐ दामोदरं तर्पयामि, इति देव तीर्थेन तर्पयेत् ।

आचमनम्--ॐ अच्युताय नमः, इत्यादिभिः ।
प्रोक्षणम्--अपवित्रः पवित्रो वा, इत्यादिभिः ॥
प्राणायामः--ॐ भूः, ॐ भुवः, ॐ स्वः, इत्यादिभिः ।

सङ्कल्पः--श्रीभगवदाज्ञया भगवत्कैङ्कर्य्यं प्रातः सन्ध्यायां गायत्री महामन्त्रजपं करिष्ये ।

अङ्गन्यासः--ॐ प्रणवस्य ऋषिर्ब्रह्मा, इति मस्तकं न्यसेत् । देवी गायत्री छन्दः इति मुखं न्यसेत् । परमात्मा श्रीमन्नारायणो देवता, इति नाभिं न्यसेत् । ॐ भूरादि सप्तव्याहृतीनां अत्रिभृगुकुत्स, वसिष्ठ गौतम कश्यपाङ्गिरसऋषयः, इति मस्तकं न्यसेत् । गायत्र्युष्णिगनुष्टुब्बृहती पङ्क्तित्रिष्टुब्जगत्यश्छन्दांसि, इति मुखं न्यसेत् । अग्नि वायुर्वर्क वागीशेन्द्र वरुण विश्वे देवा देवताः, इति नाभिं न्यसेत् । गायत्र्या विश्वामित्र ऋषि, इति मस्तकं न्यसेत् । दैवी गायत्री छन्दः, इति मुखं न्यसेत् । श्रीसूर्य्यान्तर्यामी परमात्मा देवता, इति नाभिं न्यसेत् ।

गायत्री जप --१०८ वा २८ वा १०
प्राणायामः—ॐ भूः, ॐ भुवः, ॐ स्वः इत्यादिभिः ।

सङ्कल्पः-श्रीभगवदाज्ञया भगवत्कैङ्कर्यं प्रातः सन्ध्योपस्थानं करिष्ये ।

उत्थानम्--मित्रस्य चर्षणी धृतः श्रवो देवस्य सानसीम् । सत्यं चित्रः श्रवस्तवम् । मित्रोजनान् जातयति प्रजानन् मित्रो-दाधार पृथिवी मुतद्यां । मित्रः कृष्टिरनिमिषाभिचष्टे सत्याय हव्यम् घृतवद्विधेम । प्रसमित मर्त्यो अस्तु पयस्वान्न्यस्त आदित्य शिक्षति व्रतेन न हन्यते न जीयते त्वोतो नैनमꣳ हो अश्नोत्यन्ति ततो न दूरात् ।

सन्ध्या नमस्कारः—ॐ सन्ध्यायै नमः, सावित्र्यै नमः, गायत्र्यै नमः सरस्वत्यै नमः, सर्वाभ्योदेवताभ्यो नमः, कामोऽकार्षीन्, मन्युरकार्षीन् नमो नमः ।

अभिवादनम्--अमुक प्रवरान्वित. अमुक गोत्रः अमुक शर्म्मा अमुक नामाहमस्मि भो..... ।

दिङ् नमस्कारः—प्राच्यै दिशे नमः, दक्षिणायै दिशे नमः, प्रतीच्यै दिशे नमः, उदीच्यै दिशे नमः, ऊर्ध्वाय नमः, अधराय नमः, अन्तरिक्षाय नमः ।

ध्यानम्—ऋतꣳ सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् ।
ऊर्ध्वरेतं विरूपाक्ष विश्वरूपाय वै नमः ॥१॥

ध्येयः सदा सवितृमण्डलमध्यवर्त्ती नारायणः सरसिजासनसन्निविष्टः । केयूरवान् मकरकुण्डलवान् किरीटी हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥२॥ शङ्खचक्रगदापाणे द्वारकानिलयाच्युत । गोविन्द पुण्डरीकाक्ष रक्ष मां शरणागतम् ॥३॥

ब्रह्मार्पणम्—कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतेः स्वभावात्। करोमि यत् यत्सकलं परस्मै नारायणायेति समर्पयामि ॥

जपस्थानप्रोक्षणम्—ॐ भूर्भुवः स्वः

प्रधानदिङ्नमस्कारः—श्रीरङ्ग मङ्गलमणिं करुणानिवासं श्रीवेङ्कटाद्रिशिखरालयकालमेघम् । श्रीहस्तिशैलशिखरो-ज्ज्वलपारिजातं श्रीशं नमामि शिरसा यदुशैलदीपम् ॥१॥

पुनः—यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥१॥

प्रमादात् कुर्वतां कर्म्म प्रच्यवेताध्वरेषु यत् ।
स्मरणादेव तद्विष्णो सम्पूर्णं स्यादिति श्रुतिः॥२॥

॥ इति श्रीवैष्णवानां सन्ध्योपासनविधिः ॥